# सांख्यदर्शनम्

1) अजामेकां लेहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ।।

(श्वेताश्वतरोपनिषद् 4-4)

2) मायां तु प्रकृतिं विद्यान्मायिनं महेश्वरम् ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ।।

(श्वेताश्वतरोपनिषद् 4-10)

3) सत्त्वं रजस्तम इति प्राकृतं तु गुणत्रयम् ।
एतन्मयी च प्रकृतिर्माया या वैष्णवी मता ।।

(महाभारतम् – शान्तिपर्वमोक्षधर्मः 33-31)

4) दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ । (सां.का.1)

5) मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ।। (सां.का.3)

6) दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ।। (सां.का.4)

7) अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्यात् व्यवधानादभिभवात्समानाभिहाराच्च । (सां.का.7)

8) असदकरणादुपादानग्रहणात् सर्वसंभवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ।। (सां.का.9)

1. असदकरणात् – शशश्रृङ्गं नोत्पद्यते – असत् अकरणम्
2. उपादानग्रहणात् – तैलम् तिलेभ्यः उत्पद्यते – कारणं कार्येण संबद्धं प्रागुत्पत्तेः कार्यजनकम्
3. सर्वसम्भवाभावात् – सिकताभ्यः तैलं नोत्पद्यते – असम्बद्धत्वात्
4. शक्तस्य शक्यकरणात् – तन्तुभ्यः पट उत्पद्यते
5. कारणभावात् – अभिन्ना तन्तवः कारणं पटकार्यस्य
6. उत्पत्तिः = आविर्भावः, विनाशः = तिरोभावः
7. असत्कार्यवादः बौद्धानाम् – असतः सदुत्पद्यते – भावः सत्
8. सत्कार्यवादः वेदान्तिनम् – सतो ब्रह्मणः सत् – विवर्तः सत्
9. सत्कार्यवादः वैशेषिकाणाम् – सतः असदुत्पद्यतेः – व्द्यणुकादि अनित्यं, अनित्यम् असत्

10. सत्कार्यवादः सांख्यानाम् – सतः सदुत्पद्यते – अनागतावस्थं सत्

9) सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ।। (सां.का.13)

10) पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ।। (सां.का.21)

11) प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ।। (सां.का.22)

## पञ्चविंशति – तत्त्वानि

- मूलप्रकृतिः-1
  अव्यक्तम्
  प्रधानम्
  प्रकृतिः (व्यक्तानां कारणम्)
  आविकृतिः = न कस्यापि कार्यम्
- प्रकृतिविकृतिः-7
  - महत्तत्त्वम्
    बुद्धिः
  - अहंकारः
  - पञ्च तन्मात्राणि
    (दिव्य विषयाः)
    1. शब्दः
    2. स्पर्शः
    3. रूपम्
    4. रसः
    5. गन्धः

  एतेषां कारणत्वं कार्यत्वं च
- विकृतिः-16
  - मनः-1
  - ज्ञानेन्द्रियाणि-5
    1. चक्षुः
    2. कर्णः
    3. नासिका
    4. जिह्वा
    5. चर्म
  - कर्मेन्द्रियाणि-5
    1. वाक्
    2. पाणिः
    3. पादः
    4. पायुः
    5. उपस्थः
  - महाभूतानि
    1. पृथिवी
    2. जलम्
    3. तेजः
    4. वायुः
    5. आकाशः

  एतेषां केवलं कार्यत्वम्
- पुरुषः
  न प्रकृतिर्नविकृतिः
  अथं न कस्यापि कारणम्
  कार्यं वा चित्स्वरूपः